# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** (New) | **गुणाः** – ७० |
| **विषयः** – स्वामिनारायणवेदान्तः(S) | **कोड– CC - 1.1.1** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १९/१२/२०१८ | **सन्दर्भग्रन्थः**– घनश्यामगीता | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ कयोश्चिद् द्वयोः ससन्दर्भपूर्वकं व्याख्या कार्या ।** १०

१. जननि त्वद्धितं वच्मि यन्मया प्रतिपादितम् ।
महर्षिवर्त्मना पूर्वमागमनिगमादिषु ॥

२. स्वात्मानं ब्रह्मरूपेण विभाव्य विहिता प्रसु ।
विघ्नैरहन्यमाना सा साङ्गा मन्मोदसाधिका ॥

३. प्राकट्यं मे तदर्थं हि तस्मान्मच्छरणं सदा ।
मत्स्वरूपस्य साधूनां सर्वेषां हितकारकम् ॥

**प्र–२ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१. सत्पुरुषलक्षणानि विवर्णय ।

२. पूर्वभूमिकानुसारं घनश्यामगीताप्रोक्तैकान्तिकधर्मवैशिष्ट्यम् ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ कयोश्चिद् द्वयोः ससन्दर्भपूर्वकं व्याख्या कार्या ।** १०

१. शीलं धर्मः सदाचारोऽनर्थान्तरं हि कथ्यते ।
लोकलज्जा सुखं कीर्तिः प्राप्यते तेन निश्चयात् ॥

२. उल्लङ्घयन्ति ये मन्दा हरेराज्ञां विमुक्तिदाम् ।
अत्युन्मत्ता जना मातः विज्ञेयास्ते नराधमाः ॥

३. शक्तिरूपाऽस्ति मे माया ब्रह्माण्डबीजरूपिणी ।
अहम्ममत्वरूपाऽस्ति जीवानां भवबन्धनी ॥

**प्र–४ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१. द्वितीयाऽध्यायस्य सारं लिखत ।

२. पञ्चतत्त्वावबोधं कारयतु ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ कयोश्चिद् द्वयोः ससन्दर्भपूर्वकं व्याख्या कार्या ।** **१०**

१. भणितं तद्धि वैराग्यं रागभावो हरिं विना ।
अनासक्तिर्हि वैराग्यं भोगोत्मेषु सर्वथा ॥

२. परमात्मनि यो रक्तो मय्यानन्दस्वरूपिणि ।
नेच्छति लौकिकं सौख्यं प्रेमातो वर्धय प्रभौ ॥

३. यथा पतिव्रता नारी सेवते स्वपतिं सदा ।
तथाऽनन्येन भावेन सेवनीयो हरिर्मुदा ॥

**प्र-६ एकं निबन्धात्मकोत्तरं लिखत ।** **१०**

१. चतुर्थाऽध्यायानुसारं वैराग्यबोधं स्पष्टीकुर्यात् ।

२. भक्तिः कतिविधा ? परोक्षभक्त्याः प्रत्यक्षभक्तिः कथं श्रेष्ठा ?

**प्र-७ दशानामतिलघूत्तराणि देयानि ।** **१०**

१. 'अथ' शब्दः कस्मिन्नर्थे प्रयुक्तः ?

२. 'अहमक्षरधामेश' इत्यत्र अहम् शब्दः किं बोधयति ?

३. कति श्लोकैः घनश्यामगीता अलङ्कृता ?

४. ब्राह्मीटीकायां किं निरूपितम् ?

५. योनेः कति प्रकाराः सन्ति ?

६. आश्रमाः कतिविधाः ?

७. कः जन्मसमयादेव निर्ययौ ?

८. वेदवचनप्रत्यक्षहरिवचनयोर्मध्ये किं श्रेष्ठम् ?

९. कस्य मुख्याकारः मर्कस्याभवत् ?

१०. कति कलाः सन्ति ?

११. किं तत्त्वं सर्वोत्कृष्टम् ?

१२. श्रीकृष्णः केन सह मथुरां गन्तुम् उद्यते ?

१३. चरमप्रलयः अर्थात् किम् ?

१४. नवधाभक्तिः मूलरूपेण कस्मिन् ग्रन्थे विद्यते ?

१५. पादसेवनभक्तौ कः विवेकः महाराजेन प्रशिक्षितम् ?